## लृटः सद्वा। (१४/३१०७)

लृटः स्थाने [1]सत्सञ्ज्ञौ शतृशानचौ वा [2]भवतः। व्यवस्थितविभाषा [3]इयम्। तेन यथा लटः शतृशानचौ तथा अस्यापि भवतः। अप्रथमा[4]समानाधिकरणादिषु नित्यम्, अन्यत्र विकल्पः। करिष्यन्तं देवदत्तं पश्य। करिष्यमाणं देवदत्तं पश्य। हे करिष्यन्। हे करिष्यमाण। [5]अर्जयिष्यमाणो वसति। प्रथमासमानाधिकरणे विकल्पः – करिष्यन् देवदत्तः। करिष्यमाणो [6]देवदत्तः। करिष्यति। करिष्यते[7]॥

## अनद्यतने लुट्। (१५/३१८१)

भविष्यति इत्येव। भविष्यदनद्यतने[8]ऽर्थे वर्तमानाद् धातोः लुट् प्रत्ययो भवति। लृटोऽपवादः। श्वः कर्ता। श्वो भोक्ता। अनद्यतने इति बहुव्रीहिनिर्देशः। तेन व्यामिश्रे न भवति। अद्य श्वो वा [9]भविष्यति॥

[२९५] परिदेवने श्वस्तनी भविष्यदर्थे वक्तव्या। (म. भा. २.१४३)

इयं नु कदा गन्ता, या एवं पादौ निदधाति (म. भा. २.१४३)। अयं नु कदाऽध्येता, य एवमनभियुक्तः॥

## पदरुजविशस्पृशो घञ्। (१६/३१८२)

भविष्यति इति निवृत्तम्। इत उत्तरं त्रिष्वपि[10] कालेषु प्रत्ययाः। पदादिभ्यो धातुभ्यो[11]घञ् प्रत्ययो भवति। पद्यतेऽसौ पादः। रुजत्यसौ रोगः। विशत्यसौ वेशः।

[२९६] स्पृश उपताप इति वक्तव्यम्। (म. भा. २.१४४)

स्पृशति इति स्पर्शः उपतापः। ततोऽन्यत्र पचाद्यच् भवति। [12]स्पर्शो देवदत्तः। स्वरे विशेषः॥

## सृ स्थिरे। (१७/३१८३)

सर्तेः धातोः स्थिरे कर्तरि घञ् प्रत्ययो भवति। स्थिरः इति कालान्तरस्थायी पदार्थ उच्यते। स चिरं तिष्ठन् कालान्तरं सरति इति धात्वर्थस्य कर्ता युज्यते। चन्दनसारः। [13]खदिरसारः। स्थिरे इति किम्? सर्ता। सारकः।

[२९७] व्याधिमत्स्यबलेष्विति वक्तव्यम्। (म. भा. २.१४४)

अतीसारो व्याधिः। विसारो मत्स्यः। सारो बलम्॥

---

1. सत्सञ्ज्ञकौ ह. 2. भविष्यति काले आदेशौ इत्यधिकम् अ. 3. चेयम् ग. 4. समानाधिकरणे फ. 5. अर्जयिष्यन् अ. फ, अर्जिष्यन् वसति। अध्येयमाणो वसति अ. ब. क. ड. 6. देवदत्तः नास्ति अ. 7. करिष्यमाणः इत्यधिकम् ह. 8. अर्थे नास्ति फ. ह. 9. आगमिष्यति ह, गमिष्यति ड. 10. अपि नास्ति अ. ह, वाक्यमिदं नास्ति ब. 11. कर्तरि इत्यधिकम् ह. 12. स्पशोऽयं देवदत्तस्य ब. क, स्पर्शोऽयं फ, स्पशो देवदत्तस्य अ. 13. वज्रसारः फ, नास्ति क.